
Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(2), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# व्युत्पत्तिवोदोक्तदिशा समासव्याससाधारणाभेदान्वयबोधाकाङ्क्षास्वरूपविचारः।

**Dr. Ajimon C S**
Associate Professor, Dept. of Nyaya, Govt.Sanskrit College, Thiruvananthapuram

**प्रबन्धसंग्रहः-**

अन्वयबोधः द्विविधः अभेदः भेदः चेति। पदार्थद्वयसंसर्गः संसर्गमर्यादया भासते।अभेदसंसर्गः प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते। संसर्गमर्यादा नाम आकाङ्क्षा।व्यस्तस्थले समानविभक्त्यन्तपदयोः समभिव्याहारः एव अभेदान्वयजनकाकाङ्क्षा।समासे स्वाव्यवहितपूर्ववर्तित्वं वा स्वाव्यवहितोत्तरवर्तित्वं वा आकाङ्क्षा।एवं प्रत्येकं आकाङ्क्षास्वरूपसत्वेपि उभयसाधारणाकाङ्क्षामधिकृत्य विचारः व्युत्पत्तिवादे वर्तते। तद्विषयमधिकृत्य साधुत्वासाधुत्वविचारः एव अत्र क्रियते।

**मुख्यपदानि**- संसर्गमर्यादा, अव्यवहितपूर्ववृत्तित्वं, अव्यवहितोत्तरवृत्तित्वं, विरुद्धविभक्तिराहित्यं,समानानुपूर्वीकत्वं, विशेष्यवाचकपदाप्रकृतित्वम्।

व्युत्पत्तिवादस्य प्रथमाध्याये गदाधरभट्टाचार्येण अभेदान्वयबोधः, भेदान्वयबोधः विस्तरेण प्रतिपाद्यते। तत्र शाब्दबोधकारणत्वेन आकाङ्क्षां निरूपयति। समानविभक्त्यन्तयोः पदयोः समभिव्याहारः आकाङ्क्षा। "यत्पदेन विना यत्पदस्य अन्वयाननुभावकत्वमाकाङ्क्षा इति विश्वनाथपञ्चाननः"1। ग्रन्थारमभे "एकपदार्थे अपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते" इति वाक्येन आचार्यः आकांक्षायाः प्राधान्यं स्पष्टीकरोति2। अत्र संसर्गमर्यादा नाम आकाङ्क्षा। नीलो घट इत्यत्र नीलाभिन्नो घट इति शाब्दबोधे अभेदात्मकः संसर्गः आकाङ्क्षया भासते इति गदाधरभट्टाचार्यमतम्। "अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासतेति" इति प्रतिपादनेन अभेदान्वबोधनियमान् प्रदर्शयति आचार्यः3।

1. ग्रन्थः विश्वनाथः सिद्धान्तमुक्तावली शब्दखण्डः,चौखम्बासंस्कृत संस्थान् 421.
2. ग्रन्थः –गदाधरभट्टः व्युत्पत्तिवादः आदर्शव्याख्यासहितः,राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः नवदेहली, 2011,1.
3. ग्रन्थः विश्वनाथः सिद्धान्तमुक्तावली शब्दखण्डः चौखम्बासंस्कृत संस्थान् 421.

स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वं स्वसमानविभक्तिकत्वम्। साजात्यं च विभक्तिविभाजकप्रथमात्वादिना न तु समानानुपूर्वीकत्वं साजात्यम्। अस्मिन् प्रबन्धे समासस्थले व्यस्तस्थले च अभेदान्वयबोधाकाङ्क्षाम् अधिकृत्य विचारः वर्तते।

व्यस्तस्थले अभेदान्वयबोधाकाङ्क्षा तु प्रथमाविभक्त्यन्तघटादिपदसमभिव्याहृत प्रथमान्तनीलादिपदत्वम्।नीलो घटः इत्यत्र एतादृशाकाङ्क्षा सत्त्वात् नीलत्त्वावच्छिन्नप्रकारतानिरूपितघटत्त्वावच्छिन्नविशेष्यताकशाब्दबोधः जायते। तन्नाम व्यस्तस्थले समानविभक्त्यन्तपदयोः समभिव्याहारः एव आकाङ्क्षा।नीलघटः इति समासस्थले तु घटादिपदाव्यवहितपूर्ववृत्तिनीलादिपदत्वं नीलादिपदाव्यवहितोत्तरवृत्तिघटादिपदत्त्वं वा अभेदान्वयबोधजनकाकाङ्क्षा।तस्यायमर्थः समासे स्वाव्यवहितपूर्ववर्तित्वं वा स्वाव्यवहितोत्तरवर्तित्वं वा आकाङ्क्षा। स्वाव्यवहितपूर्ववर्तित्वम् इत्यत्र स्वशब्देन विशेष्यवाचकपदं गृह्यते। स्वाव्यवहितोत्तरवर्तित्वं इत्यत्र स्वशब्देन विशेषणपदम् उद्दिश्यते। एवं समासस्थले व्यस्तस्थले च प्रत्येकं आकाङ्क्षास्वरूपमुक्तम् आचार्येण।

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(2), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

ननु नीलघटः इत्यादि समासस्थे अनेकविधाकाङ्क्षायाः अभेदान्वयबोधकारणत्त्वेनोक्तत्त्वात् तत्र व्यभिचारः भवेदिति आशङ्का। यतः यत्र घटपदाव्यवहितपूर्ववृत्तिनीलपदत्वरूपाकाङ्क्षाज्ञानानीलाभिन्नो घट इति शाब्दबोध। तत्र नीलापदाव्यवहितोत्तरवर्त्तिघटपदत्वरूपाकाङ्क्षा ज्ञानाभावे अपि नीलाभिन्नो घटः शाब्दबोधसंभवात् व्यभिचारः इति आशङ्का। किन्तु उक्ताशङ्का मास्तु यतः कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशान्नोक्ताकाङ्क्षाज्ञानयोः परस्परबोधे व्यभिचारः। अर्थात् नीलपदाव्यवहितोत्तरवर्त्तिघटपदत्वरूपाकाङ्क्षाज्ञानजन्यशाब्दबोधं प्रति नीलपदाव्यवहितोत्तरवर्त्तिघटपदत्वरूपाकाङ्क्षाज्ञानं कारणम्। एवं घटपदाव्यवहितपूर्ववृत्तिनीलपदत्वरूपाकाङ्क्षाज्ञानजन्यशाब्दबोधं प्रति घटपदाव्यवहितपूर्ववृत्तिनीलपदत्वरूपाकाङ्क्षाज्ञानं कारणम् इत्येवं कार्यकारणभावस्वीकारात् न उक्तव्यभिचारः इति गदाधरभट्टः।

**समासव्याससाधारणाकाङ्क्षा-**

समासस्थले व्यक्तस्थले च पृथक् पृथक् आकाङ्क्षा स्वीकारापेक्षया उभयसाधारणमेकाकाङ्क्षा स्वीकारे लाघवमिति उभयसाधारणाकाङ्क्षास्वरूपं प्रदर्शयति। तद्यथा – समासव्याससाधारण विशेषणपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपं विरुद्धविभक्तिराहित्यमेव तादृशान्वयबोधौपयिकाकाङ्क्षा इति4। नीलो घटः इत्यत्र विशेष्यवाचकपदं घटपदम्। तदप्रकृतिकविभक्तिः सुविभक्तिः। विशेष्यवाचकघटपदाप्रकृतिकविभक्तिः अम् विभक्तिः. अम् विभक्त्यप्रकृतित्वं विशेषणपदस्य नीलपदस्य। अतः विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपा विरुद्धविभक्तिराहित्यात्मिका आकाङ्क्षा अत्र अस्तीति नीलाभिन्नो घट इति शाब्दबोधो जायते। व्युत्पत्तिवादादर्शकारः इमाम् आकाङ्क्षां प्रति एवम् उक्तवान् - विशेष्यवाचकपदोत्तरं या विभक्तिः नास्ति सा विशेषणवाचकपदोत्तरं न स्यात् इति।

ननु विशेष्यवाचकपदस्य विशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतिकत्वरूपं विरुद्धविभक्तिराहित्यं कुतो न अभेदान्वयबोधाकाङ्क्षा इति चेन्न- नीलघटमानय इत्यादौ समन्वयाभावात्। यतः अत्र विशेषणवाचकनीलपदे विभक्तिरेव नास्ति इति उभयसाधारणाकाङ्क्षावादीनाम् मतम्। किन्तु मतमिदम् असमीचीनमिति गदाधरभट्टाचार्यः।विशेष्यवाचकपदाप्रकृतिकत्वं च नाम विशेष्यवाचकपदानुत्तरत्त्वं वा विशेष्यवाचकपदोत्तरत्त्वेन अप्रतिसन्धीयमानत्वं वा। अत्र प्रत्युच्चारणं शब्दो भिद्यते इति न्यायेन नीलो घटः इत्यत्र नीलपदोत्तरवृत्ति सुविभक्तिः घटपदोत्तरवृत्तिविभक्तेः भिन्नास्ति।

4. ग्रन्थः –गदाधरभट्टः व्युत्पत्तिवादः आदर्शव्याख्यासहितः,राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः नवदेहली, 2011,14.

अतः विशेषणविशेष्यवाचकपदोत्तरवृत्तिविभक्तेः भेदो वर्तते इति विशेष्यवाचकपदाप्रकृतिकविभक्तिप्रकृतित्वमेव विशेषणपदस्य न तु पूर्वोक्तविरुद्धविभक्तिराहित्यमित्यतः उभयसाधारणाकाङ्क्षा स्वीकर्तुं न शक्यतेति गदाधरः।

ननु विशेषणपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपं विरुद्धविभक्तिराहित्यमित्यनेन विशेष्यवाचकपदोत्तरावृत्तिविभक्तिविभाजकधर्मवद् विभक्तिराहित्यमेवोद्धिश्यते।अतः प्रत्यच्चारणं शब्दो भिद्यते इति न्यायेन पूर्वोक्तदोषो न स्यात्। पीतो घटः इति वाक्ये विशेष्यवाचकपदं घटपदं , तदवृत्ति विभक्तिः द्वितीयादिः तादृशविभक्तिविभाजको धर्मः द्वितीयात्वादिः।तद्धर्मवद्विभक्तिः द्वितीयादिः। तादृश द्वितीयादिविभक्तिराहित्यं विशेषणपदे पीतपदे अस्तीत्यतः उभयसाधारणाकाङ्क्षास्वीकारे न कोपि दोषः।

पीतघटम् इत्यादि समासे विशेष्यवाचकघटपदोत्तरावृत्तिविभक्तिविभाजकधर्मः तृतीयात्वादयःतादृशतृतीयादि विभक्तिराहित्यं पीतपदे अस्ति।यतः पीतपदोत्तरं विभक्तिरेव नास्ति। किन्तु मतमिदं न समीचीनमिति गदाधरः। तत्र कारणं तु विभक्तिविभाजकप्रथमात्वादि

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(2), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

धर्माणां ज्ञानं सर्वेषां न भवेत्। व्याकरणशास्त्रज्ञानिनः तत् स्यात्।अतः तादृशधर्मज्ञानरहितानां पुरुषाणां नीलो घटः इत्यादि वाक्यात् शाब्दबोधो नैव भवेत्। तस्मात् गदाधरभट्टः इदं मतं निराकृतवान्। तदुच्यते - तर्हि विभक्तित्वादिकमजानतः पुरुषस्य तादृशधर्मज्ञानासंभवाच्छाब्दबोधानुपपत्तिःइति ।5.ननु शाब्दबोधं प्रति आकाङ्क्षा स्वरूपसत्या एव कारणं न तु आकाङ्क्षायाः ज्ञाने सत्येव शाब्दबोधः इति नियमः। अतः विभक्तिविभाजकधर्माणां ज्ञानारहिस्य पुरुषस्यापि शाब्दबोधो भवत्येव इति केचन वदन्ति। किन्तु तन्न समीचीनम्। यदि आकाङ्क्षाज्ञानं न शाब्दबोधकारणं तर्हि नीलो घटः इत्यत्र विशेष्यवाचकपदोत्तरावृत्तिविभक्तिविभाजकधर्मवद्विभक्तिराहित्यरूपा आकाङ्क्षा अस्त्येव।

5. ग्रन्थः –गदाधरभट्टः व्युत्पत्तिवादः आदर्शव्याख्यासहितः,राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः नवदेहली, 2011, 15.

तथापि यः पुरुषःनीलपदोत्तर सुविभक्तेः अम् प्रत्ययत्वेन भ्रमया जानाति तस्य नीलाभिन्नो घटः इति शाब्दबोधो भवेत्। किन्तु नीलो घट इत्यत्र नीलपदोत्तरम् अम् प्रत्ययत्वेन भ्रमात्मकज्ञानवतः नीलाभिन्नो घटः इति शाब्दबोधो नानुभूयते। अतः आकाङ्क्षा स्वरूपसत्त्या न कारणम्। आकाङ्क्षाज्ञानस्यैव शाब्दबोधकारणत्वम् इति अवश्यं वाच्यम्। अन्यथा नीलस्य घट इत्यत्रापि नीलपदोत्तरषष्ठ्यादेः सुपदत्वेन भ्रमज्ञानेपि नीलाभिन्नो घट इति शाब्दबोधापत्तिः भवेत्।अतः आकाङ्क्षायाः स्वरूपेण शाब्दबोधकारणत्वं न युक्तमिति गदाधरभट्टः।

ननु उक्तदोषाणां सत्त्वेपि नीलो घटः नीलघटः इत्यादि द्विविधबोधसाधारणाकाङ्क्षास्वरूपं वक्तुं शक्यतेति केचन वदन्ति। तदुच्यते –" अथ नीलो घट नीलघट इत्यादि द्विविधबोधसाधारणं स्वोत्तरसुप्पदभिन्नपदानुत्तरत्वविशिष्टस्वोत्तरत्वादिरूपस्वाव्यवहितोत्तरत्वसंबन्धेन नीलादिपदवत्सुबन्तघटादि पदत्वमेव तथास्तु इतिचेत्"6। स्वोत्तरम् इत्यत्र स्वपदेन विशेषणवाचकपदम् उद्धिश्यते। नीलो घट इत्यत्र नीलपदं विशेषणम्। नीलपदोत्तरवृत्ति सु पदं विभक्तिपदं, सुप्पदभिन्नपदं पटादि पदम्। तादृशपटादिपदानुत्तरत्वविशिष्टस्वपदं विशेष्यवाचकनीलपदम्। तादृशनीलपदोत्तरत्वादिरूपं स्वाव्यवहितोत्तरत्वं, तत्संबन्धेन नीलपदवत् सुबन्तघटपदं तदेवाकाङ्क्षा इति तेषामाशयः। किन्तु अयमपि न युक्तः इति गदाधरः। यतः नीलघटरूपम् इत्यत्र पूर्वोक्ताव्यवहितोत्तरत्वसंबन्धेन नीलादिपदवत् सुबन्तपदत्वं नास्ति इति अन्यविधाकाङ्क्षायाः अपि समासस्थले स्वीकर्तव्यमिति समासव्याससाधारणाकाङ्क्षा स्वरूपं वक्तुं न शक्यतेति आचार्याः। नीलघटरूपमित्यत्र नीलं च तत् घटरूपम् इति कर्मधारयसमासः। नीलघटरूपमित्यत्र रूपमिति विशेष्यवाचकपदस्य नीलेति विशेषणवाचकपदाव्यवहितोत्तरत्वं नास्ति । विशेषणविशेष्यवाचकपदयोर्मध्ये घट इति पदसत्त्वात्।

6. ग्रन्थः –गदाधरभट्टः व्युत्पत्तिवादः आदर्शव्याख्यासहितः,राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः नवदेहली, 2011,16.

अतः नीलघटरूपम् इत्यत्र शाब्दबोधसिद्ध्यर्थं अन्यविधाकाङ्क्षायाः आवश्यकत्वात् समासव्याससाधारणशाब्दबोधजनकाङ्क्षास्वरूपं वक्तुं न शक्यतेति भट्टाचार्यमतम्। तदुच्यते-" नीलघटरूपम् इत्यादि वाक्यसाधारण्यानुरोधेन अन्यादृश्यापि आकाङ्क्षायाः समासस्थले उपगन्तव्यतयोपदर्शितसमासव्याससाधारणानुगताकाङ्क्षानुसरणस्याप्रयोजकत्वादिति"। *7*

नीलं घटमानय इत्यादि स्थले नीलपदोत्तरवृत्ति विभक्त्यर्थस्य कर्मत्वस्य कुत्रान्वयः इति चेत् कुत्रापि तस्यान्वयो नास्ति। विभक्तिप्रत्ययस्य प्रयोगसाधुत्वार्थमेवेति समाधानम्। यदि विभक्तिप्रयोगः साधुत्वार्थमिति वादः न स्वीकरोति तर्हि अभेदः भवतु विभक्त्यर्थः समासस्थले विभक्त्यभावात् तत्र संसर्गमर्यादया भानं भवतु इति वदति।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:9(2), September 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**उपसंहारः-**

एवं समासव्याससाधारणाकाङ्क्षा वक्तुं न शक्यतेति स्पष्टमेव। शक्यते चेदपि तत्र अनेकविधाः दोषाः सन्तीति प्रदर्शितम्। तस्मात् व्यस्तस्थले समानविभक्त्यन्तपदयोः समभिव्याहारः एव आकाङ्क्षा।यथा नीलो घटः इतिवत्। समासे स्वाव्यवहितपूर्ववर्त्तित्वं वा स्वाव्यवहितोत्तरवर्त्तित्वं वा आकाङ्क्षा। स्वाव्यवहितपूर्ववर्त्तित्वं इत्यस्य विशेष्यवाचकपदाव्यवहितपूर्ववृत्तिविशेषणपदम् इत्यर्थः। स्वाव्यवहितोत्तरवर्त्तित्वं इत्यस्य विशेषणपदाव्यवहितोत्तरवर्तिविशेष्यपदम् इत्यर्थः। उदाहरणं नीलघटः।

7. ग्रन्थः –गदाधरभट्टः व्युत्पत्तिवादः आदर्शव्याख्यासहितः,राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः नवदेहली, 2011, 16.

**सहायकग्रन्थाः-**

1. ग्रन्थः आर्यादेवी टी- शब्दप्रमाणविचारः,सपर्या पब्लिक्केषन्स् त्रिश्शूर्, 1997.
2. ग्रन्थःगदाधरभट्टाचार्यःव्युत्पत्तिवादः,आदर्शव्याख्यासहितः,राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः नवदेहली, 2011.
3. ग्रन्थः-रामानुजताताचार्यः विद्वन्मनोरमाव्याख्या, राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः।
4. ग्रन्थः-विश्वनाथपञ्चाननः- न्यायसिद्धान्तमुक्तावली, कृष्णदास् अकादमी, वाराणसी 2011।